विधूमोऽग्निरिव ज्वलन्। स तस्यां पितृकन्यायां (पुलस्त्यकन्यायाम्) पीवर्य्यां जनयिष्यति। कन्यां पुत्रांश्च चतुरो योगवर्म्मान् महाबलान्। कृष्णं गौरं प्रभुं शम्भुं कृत्वीं कन्यां तथैव च। ब्रह्मदत्तस्य जननीं महिषीं त्वणुहस्य च" हरिवं० १८अ०। "अणुहोनाम तस्यासीत् पुत्रः परमधार्म्मिकः। प्रादात् कन्यां शुक स्तस्मै कृत्वीं पूजितलक्षणाम्। सत्यशीलगुणोपेतां योगधर्म्मरतां सदा" हरिवं० २३अ०

वेदे त्वात्व्रादि० आतईत्त्वम्। २कर्त्त्वर्थे च। "अपागूहन्नमृतां मर्त्येभ्यः कृत्वी" ऋ० १०।१७।२। "कृत्वी कृत्वा" भा० "जातवेदोऽवाड्ढव्यानि सुरभीणि कृत्वी" १०।१५।१२। ३कर्म्मणि स्त्री० "निरु० "भ्रातरस्तु वः कृत्व्य्रेमसि" ऋ० १।१६१।३। "कृत्व्या कर्म्मणा एमसि एम" भा०

**कृत्व्य** त्रि० कृत्वीं कर्म्म अर्हति यत्। कर्म्मार्हे कर्म्मकारके "अज्यसेऽग्ने राजा न कृत्व्यः" ऋ० ६।२।८ "कृत्व्यः हविर्वहनादीनां कर्म्मणां कर्त्ता" भा०

**कृत्स** न० कृन्तति कृणत्ति वा कृत—छेदने वेष्टने वा सः किच्च। जले२समुदाये ३पापे पु० सि० कौ०

**कृत्स्न** न० कृत—क्स्न। १सकले २जले ३कुक्षौ पु०। २अशेषे त्रि० मेदि० "तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत्" गीता। कृत्स्नस्य भावः ष्यञ्। कार्त्स्न्य—न० तल्। कृत्स्नता स्त्री त्व कृत्स्नत्व। न० साकल्ये। "कार्त्स्न्याख्योः सम्पद्यमाने सातिः। जलसात् सम्पद्यते

**कृदर** पु० कृ—अरन् "कदरादयश्च" उणा० नि०। कुसूले अन्नकोष्ठे उज्ज्वल०। २दिग्भ्रत्तरे च न० निरु०। ३गर्त्ते पु० निरु०।

**कृधु** त्रि० कृत—उन् बा० कित् पृषो०। ह्रस्वे निरु०। "यदस्या अंहुभेद्याः कृधु स्थूलमुपातसत्" यजु०२३,२८,"प्रतीत्येन कृधुना तृप्रासः" ऋ०४,५,१४,कृधुना ह्रस्वेन" भा० "मम स्वनात् कृधुकर्णो भयासे" ऋ०१०,२७,३स्वार्थे क। तदार्थे। ततः अतिशायने इष्ठन् ऋतोरः। क्रधिष्ठ। ईयसुन्। कृधीयस् अतिशयेनह्रस्वे त्रि० ईयसुनि स्त्रियां ङीप्। भावे इमनिच् क्रधिमन् पु० अण् कार्ध्व न० ह्रस्वत्वे

**कृन्तत्र** न० कृत—क्त्रन् मुम् च। लाङ्गले सि०कौ०।

**कृन्तन** न० कृत—ल्युट् बा० मुम् च। १छेदने कर्त्तने "कृन्तनं नखकेशानां छेदनञ्च वनस्पतेः। शावाशौचे न कर्त्तव्यं पठनं पाठनं तथा" नारदः। कर्त्तरि ल्यु मुम् च। २छेदके त्रि० करणे ल्युट्। बा० मुम् च। ३छेदनसाधने "नातः परं कर्म्मनिबन्धकृन्तनम्" भाग० ६,२,४, स्त्रियां ङीप्। नखनिकृन्तनी

**कृन्तविचक्षणा** स्त्री कृन्त (छिन्धि) विचक्षण! इत्युच्यते यस्यां क्रियायां मयू० स०। विचक्षणसम्बोधनकर्त्तनार्थनिदेशक्रियायाम्।

**कृप** कल्पने(सम्पत्तौ)भा०आत्म०लुङि लुटि लृटि लृङि च उभ० इतादि अक० वेट्। अस्य ऋतः रकारस्थाने लः। कल्पते। अकल्पत्—अकल्पिष्ट—अक्लृप्त। कल्प्तासि कल्पितासे कल्प्स्यति कल्प्स्यते-कल्पिष्यते। कल्पितव्यः-कल्प्तव्यः कल्पनम् कल्पः। क्लृप्तः क्लृप्तिः। णिचि। कल्पयति ते अचकल्पत् त-अचीक्लृपत् त। कल्पितः कल्पना कल्पयिता। "क्लृपि सम्पद्यमाने" वार्त्ति०। एतद्योगे सम्पद्यमाने कर्त्तरि चतुर्थी। भक्तिर्ज्ञानाय कल्पते। "कल्पवित् कल्पयामास वन्यामेवास्य संविधाम्" "क्लृप्तेन सोपानपथेन" रघुः। "रुचिरंप्रक्लृप्तम्" भट्टिः "प्रजापतिकल्पितयज्ञभागम्" कुमा०। छेदने च सक० "क्लृप्तकेशनखश्मश्रुः" मनुः "कल्पनं छेदनम्" कुल्लू०।

अनु+प्रथमविधानप्रतिनिधीकरणे सक० "शक्तः प्रथमकल्पस्य योऽनुकल्पे प्रवर्त्तते" स्मृतिः।

अव+अवधारणे "अनवक्लृप्तावेवः" सि० कौ०।

आ+भूषणे सक० आकल्पः भूषा

वि+ कल्पि—संशये विकल्पयति संशेते इत्यर्थः।

सम्—कल्पि इदं करिष्यामीत्येवंरूपे मानसव्यापारभेदे। "कामः संकल्पोविचिकित्सेत्यादि" श्रुतिः "मनसा संकल्पयति वाचाऽभिलपति" स्मृतिः। मानसकर्म्माभिलापने "संकल्पेन विना राजन्! यत्किञ्चित् कुरुते नरः" ति०त०।

**कृप** दौर्बल्ये अद० चुरा० उभ० अक० सेट्। कृपयति ते अचिकृपत् त[ल्पयति ते कल्पति अचकल्पअचीक्लृपत्—त अकल्पीत्।

**कृप** युतौ चित्रीकरणे वा चुरा० पक्षे भा० पर० सेट्। क-

**कृप** पु० चु०कृप—अच्। राजर्षिभेदे "यथा रुशमं श्यावकं कृपमिन्द्र! प्रावः" ऋ० ८,३,१२, "रुशमं श्यावकं कृपं चैतन्नामकांस्त्रीन् राजर्षीन्" यथा प्रावः" भा०। कृपा अस्त्यस्य पालनसाधनत्वेन अर्श० अच्। शरद्वतो गौतमस्य २पुत्रे ३तत्सुतायां स्त्री ङीप्। यथा च तयोरुत्पत्तिस्तन्नामता च तथा भा०आ०१३०अ०उक्तं यथा "कृपस्यापि मम ब्रह्मन्! सम्भवं वक्तुमर्हसि। शरस्तम्बात् कथं जज्ञे कथं वाऽस्त्राण्यवाप्तवान्। वैशम्पायन